International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 134-136
© 2017 IJSR
www.anantaajournal.com
Received: 14-11-2016
Accepted: 19-12-2016

**डः सुवल चन्द्र साहु**
अध्यापक, व्याकरणविभाग,
सरकारी डिग्री संस्कृतमहाविद्यालय,
वारिपदा, भारत

**Correspondence**
**डः सुवल चन्द्र साहु**
अध्यापक, व्याकरणविभाग,
सरकारी डिग्री संस्कृतमहाविद्यालय,
वारिपदा, भारत

# वृद्धिरादैच् - इति सूत्रस्योपवृंहणम्

## डः सुवल चन्द्र साहु

**प्रस्तावना**

शव्दार्थोभयनिष्ठां वाच्यवाचकभावलक्षणां तादात्म्यसंबन्धरुपां पदपदार्थनिरुपितां शक्तिं समाश्रित्य शक्तिग्राहकेषु "वृद्धिरादैच्"[1]प्रभृतिषु समानविभक्तिकत्वं संगिरते सूत्रकारः वैयाकरणमूर्धन्यः पाणिनिः । 'वृधु-वृद्धौ' इत्यस्मात् क्तिनि 'झषस्तथोर्धोधः'[2] इति तवर्णस्य धत्वे 'झलांजस् झशि'[3]सूत्रेण पूर्व धकारस्य दकारे वृद्धिपदं निष्पद्यते । "वृद्धिरादैच्" इति सुत्रव्याख्याने उद्योतकारेण स्फुटीकृतः यत्[4]- द्विपदं सूत्रं,कृतमनयोः साधुत्वम् इति भाष्यदर्शनात् । अन्यथा उद्देश्यानेकत्वात् वृद्धि शव्दस्यावृत्तिः वाक्यार्थवोधाय कार्या स्यात् । वृद्धिः, आद्, ऐच् पदत्रयमालोक्य त्रिपदं सूत्रं केचन आमनन्ति । भाष्ये वृद्धि शव्दस्य आवृत्या योज्यः । अत्र वृद्धि-संज्ञा, आदैच्- संज्ञी ।

भाष्ये- "चोःकुः"[5] सूत्रेण पदस्य कुत्वे प्राप्ते "अयस्मयादीनिछन्दसि" सूत्रेण भत्वात् निषिध्यते ।"छन्दोवत्सूत्राणि भवान्ति"[6] इति दिशा कुत्वं नाशंकनीयम् इति समाधानासाधिका भाष्येष्टिः । अत्र पदत्वात् कुत्वं न, भत्वात् जश्त्वं न इति भाष्याशयः । भाष्यकारेण संज्ञाधिकारसम्बन्धे वार्त्तिकद्वयं समुपन्यस्तम् यथा-

क-संज्ञाधिकारः संज्ञासंप्रत्ययार्थः"[7] इति वार्त्तिकानुरोधेन "अथ संज्ञा" इति अधिकार सुत्रमुपज्ञाय वृद्धयादीनां शव्दानां संज्ञासंप्रत्ययः यथा स्यात् ।

ख- इतरथा ह्यसंप्रत्ययो यथा लोके"[8] अक्रियमाणे संज्ञाधिकारे वृद्धयादीनां शव्दानां संज्ञासंप्रत्ययः ना स्यात्, यथा लोके दशदाड़िमानि षड़पूपाः ।इति अनर्थकानां न वोधापत्तिः । समाधानावसरे वक्ष्यमाणानि वार्त्तिकानि विमृश्यन्ते ।

"आचार्याचारात् संज्ञासिद्धिः"[9] "यथा लौकिक वैदिकेषु"[10] "संज्ञासंज्ञ्यभेदशच"[11] "अनाकृतिः"[12] प्रभृतिभिः वार्त्तिकैराचार्याणामाचारात् नाम उपचारात् व्यवहारात् संज्ञा विज्ञायते । अत्र कैयटेन प्रदीपे [13] प्रपंचितम् यत्- वृद्धिः, आदैच् इति आकृत्या साहचर्यात् वृद्धिशव्दः-एकत्वात् संज्ञा, आदैचां वहुत्वात् संज्ञित्वं बोध्यम् ।

वृद्धिसंज्ञासूत्रे लौकिकोपचारोपगमः–"यथा लौकिकवैदिकेषु"[14] इति वार्त्तिकाख्यानावसरे उच्यते- यथा जातस्य पुत्रस्य पितरौ नाम कुर्वाते-देवदत्तः, यज्ञदत्त इति ।तयोरुपचारात् अन्ये जानन्ति अयमस्य संज्ञा । शेखरकारमते-[15] वृद्धिशव्दोऽत्र पदपरः नाम स्वरुपपरः, अत्र अर्थपरकत्वाभावात् नाम वृद्धिशव्दस्य स्वतन्त्रार्थस्य अनुपादानात्-कतिपयपदानि

अभ्यस्तानि-

**क-** पदपदार्थयोः तादात्म्यस्य अंगीकारात्।

**ख-** रामेति द्व्यक्षरं नाम मानभंगः पिनाकिनः।

**ग-** तयोरभेदप्रतीतेरनुभवसिद्धत्वात्।

**घ-** वृद्धिशव्दस्य संज्ञात्वम् तु व्याख्यानात्।

अत्रायं भावः यदेव वृद्धिपदम्, तदेव आदैच्पदम्। न्ययदर्शने 'अभेदस्तादात्म्यम्' तथाहि व्युत्पत्तिवादे [16] श्री गदाधरभट्टाचार्येण – स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्त्वोभयसंबन्धेन भेदविशिष्टं यत् तदन्यत्वरूपं तादात्म्यम्। यथा हि 'नीलो घटः' इत्यत्र घटत्वादयः सर्वे धर्माः उभयसंबन्धेन भेदविशिष्टा अपि तादात्म्यसंबन्धेन नीलविशिष्ट घट इति वोधः।

अद्वैतवेदान्ते- अभेद एव तादात्म्यम्। "सर्वं खल्विदं ब्रह्म ''[17] इति श्रुतिवाक्यवलात् प्रपञ्चमात्रं ब्रह्माभिन्नत्वमवधातव्यम्। न्यायदर्शनसंमतं तादात्म्यं वैयाकरणैः नांगीक्रियते। "तादात्म्यं च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्" यत्तु प्रकारान्तरेण "भेदसहिष्णुरभेदत्वेन"अर्थात् भेदसमानाधिकरणमभेदरूपं तादात्म्यमत्र प्रतीयते। वृद्धिः- विधेयम्, आदैच्- उद्देश्यम्, अतः उद्देश्य –आदैच् पदस्य पूर्वप्रयोगः कर्त्तव्यः,तथापि मंगलार्थतया विधेयस्य वृद्धिपदस्य पूर्वप्रयोगः विहितः। अत्र विधेयस्य वृद्धिपदस्य पूर्वप्रयोगे असाधुत्वं भवतीति भ्रमः न कर्त्तव्यः यतः-

"अपृक्त एकाल् प्रत्ययः' (१-२-४२) सूत्रे भाष्ये नियमवैपरित्यवलात् सूत्रकृता अपृक्त इव विधेयस्य पुर्वप्रयोगः विहितः। तत्र सर्वेसर्वार्थवाचकाः'' इत्यनेन वृद्धिशव्दे आदैचां वाचकत्वं नाम वोधकत्वं पूर्वमेव निर्णीतम्, तर्हि किमर्थं वृद्धिरादैच् सूत्रम्, तेन सूत्रमिदं व्यर्थीभूय ज्ञापयति यत् व्याकरणे या वृद्धिसंज्ञा भवति, तेन आदैचां वोधः भवति, अतः व्याकरणे वृद्धिशव्दः वोधकः वाचकः, आदैचां वोध्यत्वं वाच्यत्वं सिद्ध्यति। भाष्ये[18] वृद्धिशव्दस्य प्राक्प्रयोगसाधुत्वदर्शनाय सिद्धान्तितं यत्- "मांगलिक आचार्यः महतः शास्त्रौघस्य मंगलार्थं वृद्धिशव्दमादितः प्रयुङ्क्ते।

काशिकावृत्तौ-[19] न्यासे तु द्वन्दसमासमाश्रित्य द्विपदं सूत्रम् मन्यते, वृद्धिः, आद्, ऐच् इति पदत्रयमुपजीव्य त्रिपदं सूत्रं भाव्यम्। पदमंजर्यां [20] तथैव द्विपदं त्रिपमिति उभयथा विनिश्चितम्। समाहारद्वन्दवशात् आदैच् इति एकवचनम्। शव्दकौस्तुभे श्रीभट्टोजी दीक्षित निश्चिनोति यत्- तत्र आकार-ऐकार-औकार-वृद्धिषु अभेदः (Non-distinction) विद्यते इति। प्रौढमनोरमायां - "वृद्धिरादैच्" सुत्रस्थ-ऐच् द्वि मात्र एव, तात् परत्वात्,तेन कृष्णैकत्वम् –अत्र ऐकारः त्रिमात्रः न। एवामुत्तरसुत्रेऽपि नाम "अदेङ् गुणः" सूत्रे एङ् द्विमात्रः भवति।तेन 'गंगोदकमित्यत्र ओकारः त्रिमात्रः न स्यात्।

प्रमाणप्रपत्तिः (Science of Logic)- वृद्धिरादैच्'' इति संज्ञासूत्रस्य का तावत् प्रमाणप्रपत्तिरिति विविदिषायामुच्यते – ''इकोगुणवृद्धिः' [21] प्रभृति परिभाषासूत्रेषु, "इको यणचि' [22] इत्यादि विधिसुत्रेषु ''अंगस्य"[23] इत्यादि अधिकारसुत्रेषु, "धतोस्तन्निमित्तस्यैव''[24] "स्थानिवदादेशोऽनल्विधौ"[25] वत् अनिर्ज्ञातार्थस्य कार्यस्य तद्घटित शव्दगतासाधुत्वस्य वा साकल्येन ज्ञापकतया एतत् प्रमाकरणत्वम् "वृद्धिरादैच्" इति सूत्रे अस्त्येव। महाभाष्ये उद्योते-भाष्ये मानं हीति-अनिर्ज्ञातार्थस्य साकल्येन ज्ञापकम् ।26 तथाहि अनिर्ज्ञातार्थस्य वृद्धिकार्यस्य तद्घटित शव्दगतासाधुत्वस्य ज्ञापकतया तदेव प्रमाणप्रकर्षः गृह्यते ।पाणिनिना –"तदशिष्यं संज्ञाप्रमाणत्वात्" [27] सूत्रे प्रमाणसिद्धान्तः पाणिनिना mJeerकृतः।

**तद्भावित-अतद्भाबितयोः ग्रहणे गुणदोषौ-**

अत्र वृद्धिरित्येवं प्रकृत्य ये आकार-ऐकार-औकारा भाव्यन्ते तेषां ग्रहणे शालादिशब्दानां वृद्धिसंज्ञानापत्या शालीयादि असिद्धिः। आदैच् मात्रस्य ग्रहणे सर्वभास इत्यादौ उत्तरपदबृद्धौ सर्वं च इति एष विधिः प्राप्नोति, एवं तावद्धा इत्यादौ वृद्धिनिमित्तस्य इति पुंवत् प्रतिषेधश्च प्राप्नोति इति उभयथा दोषइति कः पक्षोज्यायान् इति जायमानायां जिज्ञासायाम् –अतद्भावित पक्ष एव। कथं सर्वभास इत्यादिदोषाणां कारणमिति चेद्, ब्रुमः- सर्वः कारकः इत्यादि दोषवारणाय उत्तरपदस्य इत्येवं प्रकृत्य या वृद्धि तद्वत् उत्तरपदे इति व्याख्यानेन अदोषः।

**सज्ञाधिकारस्य कर्त्तव्य-अकर्त्तव्यत्वे युक्तिः –**

वुद्ध्यादीनां शब्दानां सज्ञात्वेन ज्ञानार्थं सज्ञाधिकार आवश्यक इति चेन्न। तोके वेदे च आचार्याणां व्यवहारात् एव संज्ञाप्रत्ययसिद्धेः। तत् यथा लोके मातापितरौ पुत्रस्य

एकान्ते नाम कुरुतः तयोः उपचारात् अन्येऽपि जानन्ति इयम् अस्य संज्ञा इति । वेदे अपि याज्ञिकाः स्पयो यूप इत्यादि संज्ञा कुर्वन्ति, तेषामुपचारात् अन्येऽपि जानन्ति इयम् अस्य संज्ञेति । एवमत्र वृद्धिशब्दः संज्ञा ।

भाष्यदिशा एवमभिमतम्- आदैतः संज्ञिन इति ज्ञानं भविष्यति इति अनाकृति संज्ञा इति एतत् न्यायसिद्धत्मात्मन वक्तव्यम् । अयं भावः लिङ्गम् असज्य वक्ष्यामि इत्थं लिङ्गी संज्ञेति, वुद्धिशव्दे च तत् लिङ्गं करिष्यामि न आदैरशव्दे, एवं सति ङ्कारादिषु अमुकन्देषु कलादिकं लिङ्गमासंक्ष्यते,ततः तेषां संज्ञात्वे ग ङादात्मनपदमिति करिष्यते, संज्ञाश्च संज्ञिनं प्रत्याय स्वयं निवक्षर्त्तन्ते इति इत् संज्ञालदपौ च ।न वक्तवौ भवति इति महत्लाघवमिति । यद्यपि उक्तरीत्या सर्वं सिद्ध्यति तथापि अपाणिनयत्वात् पारायणादौ इष्टार्थहानिरिति यथान्यात्ममेव उचितम् । तत्र च लघुत्वात् अनुवर्त्तनात् च संज्ञयाः सम्प्रत्यय इत्यदिभिः युक्तिभिः संज्ञाधिकारः प्रत्याख्यात इति सिद्धान्तः ।

वृद्धिरादैच् इत्यत्र तपरप्रयोजनं स्पष्टयति । उसरस् –व्यक्तिः पदार्थो,भेदकाश्च गुणा इति पक्षे यद्गुणकस्य उच्चारणं तद्गुणकस्यैव संज्ञापतौ अनिष्पत्तिः सति च तपरे तपरस्तत्कालस्य इत्यनेन तत्कालकानामुदासानुदात्तस्वरित अनुनासिकानां ग्रहणसिद्धिः । न च गुणस्य भेदकत्वे किं नाममिति वाच्यम् लोके शिष्येणोदात्ते कर्त्तव्ये अनुदात्तकरणे उपाध्यायैः दण्डदानदर्शनात्, अनेक भाजनस्थे उदकद्रव्ये णान्तरयोगात् अन्यत्वेन लोके व्यवहारदर्शनात् च नु तः परो यस्मात् इति वहुव्रीहेः कथं त्रिमात्राविद्या चेन्न, तात्परः तपर इति तत्पुरुषस्यापि लक्ष्यानुरोधात् आश्रयेणेन अदोशात् । अत्रपक्षे इजौर इम्पत्र दोषस्तु न आशंक्यः, तत्र दकार तकारा विशेषोभावेन दकारः उच्चारणस्ये व पाणिनीयत्वात्।

संज्ञासंज्ञिनोरनोरन्योन्यश्रयः परिहरणाय – ननु-सतः संज्ञाभावात् तदाश्रये संज्ञाश्रये वुध्यादिपदेषु इतरेतराश्रयत्वात् अप्रसिद्धिः वाक्यार्थ अप्रसिद्धिः अविद्यमाने सस्वन्धस्य वक्तुमशक्यत्वात् यथा नौर्नादिवद्धा नेतरत्राणाय भवतीति चेत् न नित्यशब्दत्वात् । नित्येषु शव्देषु सतामेव आदैच्-आदीनां संज्ञा क्रियते, न संज्ञया संज्ञिनो विधीयन्ते इति न इतरेतराश्रय आशङ्का इत्याशयः न च शब्दानां नित्यत्वे शास्त्रवैयर्थ्यमिति वाच्यम् । निरर्थकत्वात् आचार्येण पाठकाय सामान्येन मृजादौ उपदिष्टे मार्ष्टीत्यादीनामसाधुत्य वुद्धिः प्राप्नोति तेषां साधात्व अन्नाख्यानं शास्त्रेण क्रियते, अर्थात् मृजेरकङ्किम्भू प्रत्ययेषु मृरेवुद्धिप्रसङ्गे मार्जिवृद्धः कर्त्तव्य, स एन साधुरिति दिक् ।

**पादविवृत्तिः**

1. (पा-सू१-१-१)
2. (पा-सू-८-२-४०)
3. (प-सू-८-४-५३)
4. (म.भा.१-१-३ उद्योतः)
5. (पा-सू-८-२-३०)
6. (म.भा.वा.१-१-१)
7. (म.भा.वा.१-१-३)
8. (म.भा.वा.१-१-३)
9. (म.भा.वा.१-१-३)
10. (म.भा.वा.१-१-३)
11. (म.भा.वा.१-१-३)
12. (म.भा.वा.१-१-३)
13. (म.भा.प्र.१-१-३)
14. (म.भा.वा.१-१-३)
15. (ल-शे-सं-प्र-1.1.1)
16. (व्यु.वा-प्र-का)
17. (छा-उ-३-१४-१)
18. (म.भा-१-१-३)
19. (का-वृ-प्र-१-१-१)
20. (का-वृ-प्र.मं) १-१-१)
21. (पा-सू-१-१-३)
22. (पा-सू-६-१-७७)
23. (पा-सू-६-४-१)
24. (पा-सू-६-१-८०)
25. (पा-सू-१-१-५६)
26. (म-भा-२-१-३)
27. पा-सू-(१-२-३)